योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः ०२

अज्ञातलेखकः

दिवि भूमौ तथाकाशे बहिरन्तश्च मे विभुः ।

यो विभात्यवभासात्मा तस्मै सर्वात्मने नमः ।। १

वाल्मीकिरुवाच ।

अहं बद्धो विमुक्तः स्यामिति यस्यास्ति निश्चयः ।

नात्यन्तमज्ञो नोत ज्ञः सोऽस्मिञ्छास्त्रेऽधिकारवान्

कथोपायान्विचार्यादौ मोक्षोपायानिमानथ ।

यो विचारयति प्राज्ञो न स भूयोऽभिजायते ।। ३

अस्मिन्रामायणे रामकथोपायान्महाबलान् ।

एतांस्तु प्रथमं कृत्वा पुराहमरिमर्दन ।। ४

शिष्यायास्मि विनीताय भरद्वाजाय धीमते ।

एकाग्रो दत्तवांस्तस्मै मणिमब्धिरिवार्थिने ।। ५

तत एते कथोपाया भरद्वाजेन धीमता ।

कस्मिंश्चिन्मेरुगहने ब्रह्मणोऽग्र उदाहृताः ।।

अथास्य तुष्टो भगवान्ब्रह्मा लोकपितामहः ।

वरं पुत्र गृहाणेति तमुवाच महाशयः ।। ७

भरद्वाज उवाच ।

भगवन्भूतभव्येश वरोऽयं मेऽद्य रोचते ।

येनेयं जनता दुःखान्मुच्यते तदुदाहर ।। ८

श्रीब्रह्मोवाच ।

गुरुं वाल्मीकिमत्राशु प्रार्थयस्व प्रयत्नतः ।

तेनेदं यत्समारब्धं रामायणमनिन्दितम् ।। ९

तस्मिञ्छ्रुते नरो मोहात्समग्रात्संतरिष्यति ।

सेतुनेवाम्बुधेः पारमपारगुणशालिना।।। १०

श्रीवाल्मीकिरुवाच ।

इत्युक्त्वा स भरद्वाजं परमेष्ठी मदाश्रमम्।

अभ्यागच्छत्समं तेन भरद्वाजेन भूतकृत्।। ११

तूर्णं संपूजितो देवः सोऽर्घ्यपाद्यादिना मया ।

अवोचन्मां महासत्त्वः सर्वभूतहिते रतः ।। १२

रामस्वभावकथनादस्माद्वरमुने त्वया ।

नोद्वेगात्स परित्याज्य आसमाप्तेरनिन्दितात् ।। १३

ग्रन्थेनानेन लोकोऽयमस्मात्संसारसंकटात् ।

समुत्तरिष्यति क्षिप्रं पोतेनेवाशु सागरात्।। १४

वक्तुं तदेवमेवार्थमहमागतवानयम् ।

कुरु लोकहितार्थं त्वं शास्त्रमित्युक्तवानजः ।। १५

मम पुण्याश्रमात्तस्मात्क्षणादन्तर्द्धिमागतः ।

मुहूर्ताभ्युत्थितः प्रोच्चैस्तरङ्ग इव वारिणः ।। १६

तस्मिन्प्रयाते भगवत्यहं विस्मयमागतः ।

पुनस्तत्र भरद्वाजमपृच्छं स्वस्थया धिया ।। १७

किमेतद्ब्रह्मणा प्रोक्तं भरद्वाज वदाशु मे।

इत्युक्तेन पुनः प्रोक्तं भरद्वाजेन तेन मे ।। १८

भरद्वाज उवाच ।

एतदुक्तं भगवता यथा रामायणं कुरु ।

सर्वलोकहितार्थाय संसारार्णवतारकम् ।। १९

मह्यं च भगवन्ब्रूहि कथं संसारसंकटे ।

रामो व्यवहृतो ह्यस्मिन्भरतश्च महामनाः ।। २०

शत्रुघ्नो लक्ष्मणश्चापि सीता चापि यशस्विनी ।

रामानुयायिनस्ते वा मन्त्रिपुत्रा महाधियः ।। २१

निर्दुःखितां यथैते नु प्राप्तास्तद्ब्रूहि मे स्फुटम् ।

तथैवाहं भविष्यामि ततो जनतया सह ।। २२

भरद्वाजेन राजेन्द्र वदेत्युक्तोऽस्मि सादरम् ।

तदा कर्तुं विभोराज्ञामहं वक्तुं प्रवृत्तवान् ।। २३

शृणु वत्स भरद्वाज यथापृष्टं वदामि ते ।

श्रुतेन येन संमोहमलं दूरे करिष्यसि ।। २४

तथा व्यवहर प्राज्ञ यथा व्यवहृतः सुखी ।

सर्वासंसक्तया बुद्ध्या रामो राजीवलोचनः ।। २५

लक्ष्मणो भरतश्चैव शत्रुघ्नश्च महामनाः ।

कौसल्या च सुमित्रा च सीता दशरथस्तथा ।। २६

कृतास्त्रश्चाऽविरोधश्च बोधपारमुपागताः ।

वसिष्ठो वामदेवश्च मन्त्रिणोऽष्टौ तथेतरे ।। २७

धृष्टिर्जयन्तो भासश्च सत्यो विजय एव च ।

विभीषणः सुषेणश्च हनुमानिन्द्रजित्तथा ।। २८

एतेऽष्टौ मन्त्रिणः प्रोक्ताः समनीरागचेतसः ।

जीवन्मुक्ता महात्मानो यथाप्राप्तानुवर्तिनः ।। २९

एतैर्यथा हुतं दत्तं गृहीतमुषितं स्मृतम् ।

तथा चेद्वर्तसे पुत्र मुक्त एवासि संकटात् ।। ३०

अपारसंसारसमुद्रपाती

लब्ध्वा परां युक्तिमुदारसत्त्वः ।

न शोकमायाति न दैन्यमेति

गतज्वरस्तिष्ठति नित्यतृप्तः ।। ३१

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे सूत्रपातनको नाम द्वितीयः सर्गः ।। २ ।।